CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.13.
Coll. No. 543

Title Kāśikā vritti

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 543 Subject: Grammar.

Title: Kāśikā vritti

Author: Vāmana Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9.3" by 4.2" Extent: 118 to 135 foli

Language: Sanskrit. Script: Devanāgari

Remarks: —

११८

॥श्रीगुरुभ्यो नमः॥ ॥द्विगुरेकवचनं॥ १ ॥द्विगुसमासः एकवचनं भवति। एकवचनमेकवचनं।
एकस्यार्थस्य वाचकं भवति। न त्वनेन प्रकारेण द्विग्वर्थस्यैकवद्भावो विधीयते द्विग्वर्थ एकवद्भवतीति
समाहारद्विगोश्चेदं ग्रहणं नान्यस्य। पंचपूलाः समाहृताः पंचपूली। दशपूली। द्विग्वर्थस्यैकत्वात्तु
प्रयोगेप्येकवचनं भवति। पंचपूली इयं शोभनेति॥ ॥द्वंद्वश्च प्राणितूर्यसेनांगानां॥ २॥ एकवचन
मित्यनुवर्त्तते। अंगशब्दस्य प्रत्येकं परिसमाप्यात्प्राणिवाक्यानि संपद्यंते। प्राण्यंगानां द्वंद्व एकवद्भवति॥
तथा तूर्यांगानां सेनांगानां च। प्राण्यंगानां तावत्। पाणिपादं। शिरोग्रीवं। तूर्यांगानां। मार्दंगिकपाण
विकं। वीणावादकपरिवादकं। सेनांगानां। रथिकाश्वारोहं। रथिकपादातं। हस्त्यश्वादिषु परत्वात्पशु
द्वंद्वविभाषैव भवितव्यं। इतरेतरयोगे समाहारे च द्वंद्वो विहितः तत्र समाहारस्यैकत्वात्सिद्धमेवै
कवचनं। इदं तु प्रकरणं विषयविभागार्थं। प्राण्यंगादीनां समाहार एव द्वंद्वः। दधिपयआदीनामि
तरेतरयोग एव। वाहृद्यभृगादीनां तु नियम इति॥ ॥अनुवादे चरणानां॥ ३॥ चरणशब्दः शाखानि १

मित्तकः पुरुषेषु वर्त्तते। चरणानां द्वंद्व एकवद्भवत्यनुवादे गम्यमाने। प्रमाणांतरावगतस्यार्थस्य शब्दे
न संकीर्त्तनमात्रमनुवादः। उदगात्कठकालापं। प्रत्यष्ठात्कठकौथुमं। कठकालापादीनामुदयप्रतिष्ठे
प्रमाणांतरावगते। यदा पुनः शाब्देनान्यथेनैतदेवेदमुदाहरणं। यदा तु प्रथमत एवोपदेशः। तदा प्रत्यु
दाहरणं। अनुवाद इति किं। उदगुः कठकालापाः। स्थेणोरद्यतन्यामिति वक्तव्यं। स्थेणोरिति किं।
अनंदीयज्जुर्वेदेषु कठकालापाः। अद्यतन्यामिति किं। उद्यंति कठकालापाः॥ ॥अध्वर्युक्रतुरनपुं
सकं॥ ४॥ अध्वर्युर्वेदे यस्य क्रतोर्विधानं सोध्वर्युक्रतुः। अध्वर्युक्रतुवाचिनां शब्दानामनपुंसकलिं
गानां द्वंद्व एकवद्भवति। अध्वर्युक्रतुरनपुंसकमिति द्वंद्व इति गोणो निर्देशः। अर्काश्वमेधं। साह्ना
तिरात्रं। अध्वर्युक्रतुरिति किं। इषुवज्रौ। उद्भिद्बलभिदौ। अनपुंसकमिति किं। राजसूयवाजपे
ये। इह कस्मान्न भवति। दर्शपूर्णमासौ। क्रतुशब्दः सोमयागेषु रूढः॥ ॥अध्ययनतोऽविप्रकृष्टा
ख्यानां॥ ५॥ अध्ययननिमित्तेन येषामविप्रकृष्टा प्रत्यासन्ना आख्या तेषां द्वंद्व एकवद्भवति॥

पदककमकं क्रमकवार्त्तिकं। संपाठः पदानां क्रमस्य च प्रत्यासत्तिः। अध्ययनत इति किम्। पितापुत्रौ। अ
विप्रकृष्टानामिति किम्। याज्ञिकवैयाकरणौ॥ ॥जातिरप्राणिनां॥ ६॥ अनुवृत्तमप्यपरेऽस्मा
मान्। नित्यमेकमनेकवृत्ति सामान्यं। अनेन यस्य आधारा जातिः। जातिवाचिनां शब्दानां द्वंद्व एकवद्भवति
प्राणिनो वर्जयित्वा। आराशस्त्रि। धानाशष्कुलि। युगवरत्रं। जातिरिति किम्। नंदकपांचजन्यौ। अप्राणि
नामिति किम्। ब्राह्मणक्षत्रियविट्शूद्राः। न त्विव युक्तन्यायेन द्रव्यजाती नामयमेकवद्भावः। न गुणक्रि
याजातीनां। रूपरसगंधस्पर्शाः। गमनाकुंचनप्रसारणानि। जातिपरत्वे च सति जातिशब्दानामयमेक
वद्भावः। न तु निपतद्व्यविवक्षायां। इह बदरामलकानि तिष्ठंति। ॥विशिष्टलिंगो नदीदेशोऽग्रा
माः॥ ७॥ विशिष्टलिंगानां भिन्नलिंगानां नदीवाचिनां देशवाचिनां च ग्रामवर्जितानां द्वंद्व एकवद्भव
ति। न घवयवोर्द्वंद्वो नदीत्युच्यते। देशावयवस्य देशत्वादिति। नदीदेशशब्दस्य समासनिर्देशादेवार्थं। उद्ध्य
इरावति। गंगाशोणं। देवाभस्वल्लवि। कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रं। कुरुकुरुजांगलं। दार्वाभि २

भिसारं। काश्मीराभिसारं। विशिष्टलिंग इति किम्। गंगायमुने। मद्रकेकयाः। नदीदेश इति किम्।
कुक्कुटमयूर्यौ। अग्रामा इति किम्। जांबवश्च ग्रामः शालूकिनी च जांबवशालूकिन्यौ। नदीग्रहणमदेश
त्वात्। जनपदो हि देशः। न पार्वतपर्वतानां ग्रहणं भवति। कैलासश्च गंधमादनं च कैलासगंधमादने।
अग्रामा इत्यत्र नगरप्रतिषेधो वक्तव्यः। इह मा भूत्। मथुरापाटलिपुत्रे। उभयतश्च ग्रामाणां प्रतिषे
धो वक्तव्यः। शौर्यं च नगरं। केतवता च ग्रामः। शौर्यकेतवते॥ ॥क्षुद्रजंतवः॥ ८॥ अपचितपरिमाणः
क्षुद्रः। क्षुद्रजंतुवाचिनां द्वंद्व एकवद्भवति। दंशमशकं। यूकालिक्षं। क्षुद्रजंतव इति किम्। ब्राह्मण
क्षत्रियौ। क्षुद्रजंतुरनस्थिकपादयवा क्षुद्र एव यः। शतं वा प्रसृतौ येषां केचिदानकुलादपि। आन
कुलादपीत्यपमेव स्मृतिः प्रमाणं। इतरास्तान्नहि रोधात्॥ ॥येषां च विरोधः शाश्वतिकः॥ ९॥
विरोधो वैरं। शाश्वतिको नित्यः। येषां शाश्वतिको विरोधः तद्वाचिनां शब्दानां द्वंद्व एकवद्भवति। मार्जा
रमूषिकं। श्वशृगालं। अहिनकुलं। शाश्वतिक इति किं। गोपालशालंकायनाः कलहायंते। चका

रः पुनरस्यैव समुच्चयाद् ॥ तेन पशुशकुनिद्वंद्वे विरोधिनां नित्यमेकवद्भावो भवति। अश्वमाहिषं॥ काको
लूकं॥ ॥शूद्राणामनिरवसितानां॥१०॥ निरवसितं बहिष्कृतं। कुतो बहिष्कृतं पात्रात् यैर्भुक्ते पा
त्रे संस्कारेणापि न शुध्यति ते निरवसिताः। न निरवसिताः। अनिरवसिताः। अनिरवसितशूद्रवाचिनां
शब्दानां द्वंद्व एकवद्भवति। तक्षायस्कारं। रजकतंतुवायं। अनिरवसितानामिति किम्। चंडालमृतपाः
॥ ॥गवाश्वप्रभृतीनि च॥११॥ गवाश्वप्रभृतीनि शब्दरूपाणि कृतैकवद्भावानि साधूनि भवंति। ग
वाश्वं। गवाविकं। अजाविकं। अजैडकं। कुब्जवामनं। कुब्जकैरातकं। पुत्रपौत्रं। श्वचंडालं। स्त्रीकु
मारं। दासीमाणवकं। शाटीपट्टिकं। उष्ट्रखरं। उष्ट्रशशं। मूत्रशकृतं। मूत्रपुरीषं। यकृन्मेदः मांस
शोणितं। दर्भशरं। दर्भपूतिकं। अर्जुनशिरीषं। तृणोलुपं। दासीदासं। कुटीकुटं। भागवतीभाग
वतं। गवाश्वप्रभृतिषु यथोच्चारितं द्वंद्ववृत्तं। साधुरूपं नरूतु नायं विधिर्भवति। गोश्वौ। गोश्वं।
पशुद्वंद्वे विभाषैकवद्भवति॥ ॥विभाषा वृक्षमृगतृणधान्यव्यंजनपशुशकुन्यश्ववडवपूर्वाप ३

राधरोत्तराणां॥ ॥वृक्ष·मृग·तृण·धान्य·व्यंजन·पशु·शकुनि·अश्ववडव·पूर्वापर·अधरोत्तर· इत्येतेषां द्वं
द्वो विभाषैकवद्भवति। प्लक्षन्यग्रोधं। प्लक्षन्यग्रोधाः। रुरुपृषतं। रुरुपृषतौ। कुशकाशं। कुशकाशाः। व्रीहि
यवम्। व्रीहियवाः। दधिघृतं। दधिघृते। गोमहिषं। गोमहिषौ। तित्तिरिकपिंजलं। तित्तिरिकपिंजलाः।
अश्ववडवं। अश्ववडवौ। पूर्वापरं। पूर्वापरे। अधरोत्तरं। अधरोत्तरे॥ ॥बहुप्रकृतिः फलसेनावनस्प
तिमृगशकुनिक्षुद्रजंतुधान्यतृणानां॥ ॥एषां बहुप्रकृतिरेव द्वंद्व एकवद्भवति। न द्विप्रकृतिः। बदरा
मलके। रथिकाश्वारोहौ। प्लक्षन्यग्रोधौ। रुरुपृषतौ। हंसचक्रवाकौ। यूकालिक्षे। व्रीहियवौ। कुशकाशौ।
॥ ॥विप्रतिषिद्धं चानधिकरणवाचि॥१३॥ परस्परविरुद्धं विप्रतिषिद्धं। विप्रतिषिद्धार्थानां शब्दानां अ
नधिकरणवाचिनां मद्रव्यवाचिनां द्वंद्व एकवद्भवति। विभाषानुकर्षणाद्विकारः। शीतोष्णं। शीतोष्णे।
सुखदुःखं। सुखदुःखे। जीवितमरणं। जीवितमरणे। विप्रतिषिद्धमिति किम्। कामक्रोधौ। अनधिकरणवा
चिनीति किम्। शीतोष्णे उदके॥ ॥न दधिपयआदीनि॥१४॥ यथायथमेकवद्भावे प्राप्ते प्रतिषेधोयमार

२५७४
१२२

ष्वले। दधिपय आदीनि द्वन्द्वरूपाणि नैकवद्भवन्ति। दधिपयसी॥ सर्पिर्मधुनी। मधुसर्पिषी। ब्रह्मप्रजापती
शिववैश्रवणौ। स्कंदविशाखौ। दीक्षातपसी। अध्ययनतपसी। प्रवर्ग्योपसदौ। ऋक्सामे। इध्माबर्हिषी। या
ज्यानुवाक्ये। नापातनाद्दीर्घः। मेधातपसी। उलूखलमुसले। आद्यवसाने। श्रद्धामेधे। ऋक्सामे। वाङ्मनसे।
॥ ॥अधिकरणेनावत्वे च॥१५॥ नेति वर्तते। अधिकरणं वृत्तिपदार्थः सदृशसमासार्थस्याधारः तस्य एताव
त्वपरिमाणे द्वंद्वो नैकवद्भवति। यथायपं एकवद्भावः प्राप्तः प्रतिषिध्यते। दश दंतोष्ठाः। दशमार्दंगिकपा
णविकाः॥ ॥विनापासमीपे॥१६॥ अधिकरणेनावत्वस्य समीपे विना पाद्द्वंद्व एकवद्भवति। उपदशं दं
तोष्ठं। उपदशा दंतोष्ठाः। उपदशं मार्दंगिकपाणविकं। उपदशा मार्दंगिकपाणविकाः॥ अव्ययस्य सं
ख्यया अव्ययीभावो विहितः बहुव्रीहिरपि। तत्रैकैकवद्भावपक्षे अव्ययीभावो नु प्रयुज्यते। इतरत्र बहुव्री
हिः॥ ॥स नपुंसकम्॥१७॥ यस्यायमेकवद्भावो विहितः स नपुंसकलिंगो भवति। द्विगुद्वंद्वः। पंचग
वं। दशगवं। द्वंद्वस्त्वपि। पाणिपादं। पंचखट्वं। पंचखट्वी। त्रिरोग्रीवं। परवल्लिंगापवादोयं योगः॥ श्री ४

कारांतोत्तरपदो द्विगुः स्त्रियां भाष्यते। पंचमूली। दशमूली॥ पंचरथी। दशरथी। वा टाबंतः। पंचखट्वं। पंच
खट्वी॥ अनोनलोपश्च वा च द्विगुः स्त्रियां॥ पंचतक्षं। पंचतक्षी। दशतक्षं। दशतक्षी। पात्रादिभ्यः प्रतिषेधः
पंचपात्रं। दशपात्रं। चतुर्युगं। त्रिभुवनं॥ ॥अव्ययीभावश्च॥१८॥ अव्ययीभावसमासो नपुंसकलिं
गो भवति। अधिस्त्रि। अधिकुमारि॥ उन्मत्तगंगं। लोहितगंगं॥ सर्वपदार्थप्रधानस्य लिंगे नैव प्राप्ते अ
न्यपदार्थप्रधानस्य अभिधेयवल्लिंगता॥ अनश्च समुच्यते। अनुक्तसमुच्चयार्थश्चकारः। पुण्यसुदिना
मह्नः। पुण्याहं। सुदिनाहं। पथः संख्या अव्ययादेः। त्रिपथं। चतुष्पथं। विपथं। क्रियाविशेषणानां च। मृदु प
चति। शोभनं पचति॥ ॥तत्पुरुषो नञ्कर्मधारयः॥१९॥ अधिकारोयं। उत्तरसूत्रेष्वुपतिष्ठते। नञ्स
मासं कर्मधारयसमासं च वर्जयित्वा अयं तत्पुरुषो नपुंसकलिंगो भवतीत्येतदधिकृतं वेदितव्यम्
यदितऊर्ध्वमनुक्रमिष्यामः तत्र वक्ष्यति। विभाषा सेनासुरेति। ब्राह्मणसेनं। ब्राह्मणसेना। तत्पुरुष
इति किम्। दृढसेनो राजा। अनञिति किम्। असेना। अकर्मधारय इति किम्। परमसेना। उत्तमसेना॥ ॥

संज्ञायांकंथोशीनरेषु॥ २०॥ संज्ञायांविषयेकंथांतस्तत्पुरुषोनपुंसकलिंगोभवति।साचेत्कंथाउशीनरेषु
भवति।सौशमिकंथं।आह्वरकंथं।संज्ञायामितिकिम्।वीरणकंथा।उशीनरेष्वितिकिम्।दाक्षिलकंथा।
परवल्लिंगापवादइदंकरणं॥ ॥उपज्ञोपक्रमंतदाद्याचिख्यासायां॥२१॥उपज्ञायतइत्युपज्ञा
उपक्रम्यतइत्युपक्रमः।उपज्ञावउपक्रमश्च।उपज्ञोपक्रमंतदंतस्तत्पुरुषोनपुंसकलिंगोभवति॥
तदाद्याचिख्यासायां।तयोरुपज्ञोपक्रमयोरादेराचिख्यासायांगम्यमानायां।आख्यातुमिच्छाआ
चिख्यासा।यद्युपज्ञेयस्योपक्रमस्यचार्थस्यादिराख्यातुमिष्यते।तत्रएतद्भवति।पाणिन्युपज्ञंगम्य
मानायां।अकालकंव्याकरणं।पाणिनेरुपज्ञातेनप्रथमतःप्रणीतमकालकंव्याकरणं।व्याड्युपज्ञंदुष्कर
णं।आपिशल्योपक्रमंगुरुलाघवं।आद्योपक्रमंप्रासादः।नंदोपक्रमाणिविमानानि।उपज्ञोपक्रम
मितिकिम्।वाल्मीकिश्लोकाः।तदाद्याचिख्यासायामितिकिम्।देवदत्तोपज्ञोरथः।यज्ञदत्तोपक्रमोर
थः॥ ॥छायाबाहुल्ये॥२२॥विभाषासेनासुरेतिवक्ष्यति।नित्यार्थमिदंवचनं।छायांतस्तत्पुरुषोनपुंसक ५

लिंगोभवति।बाहुल्येगम्यमाने।पूर्वपदार्थधर्मोबाहुल्यं।यदिक्षुप्रभृतीनांबहुत्वंगम्यते।इक्षुच्छा
यं।बाहुल्यइतिकिम्।कुड्यछाया॥ ॥सभाराजामनुष्यपूर्वा॥२३॥सभांतस्तत्पुरुषोनपुंसकलिंगो
भवति।साचेत्सभाराजपूर्वाअमनुष्यपूर्वाचभवति।इनसभं।ईश्वरसभं।इहकस्मान्नभवति।राजस
भा।पर्यायवचनस्यैवेष्यते।तदंतविधिस्त्वस्यपर्यायस्यैवराजार्थमिति।अमनुष्यपूर्वा।रक्षःसभं।इहक
स्मान्नभवति।काष्ठसभा।अमनुष्यशब्दोरूढिरूपेणरक्षःपिशाचादिष्वेववर्तते।राजामनुष्यपूर्वेति
किम्।देवदत्तसभा॥ ॥अशालाच॥२४॥अशालाचयासंज्ञातदंतस्तत्पुरुषोनपुंसकलिंगोभव
ति।संघातवचनःसभाशब्दोत्रगृह्यते।स्त्रीसभं।दासीसभं।स्त्रीणांसंघातइत्यर्थः।अशालेतिकिम्॥
अनाथसभा।अनाथकुटीरित्यर्थः॥ ॥विभाषासेनासुराछायाशालानिशानां॥२५॥सेना।सुरा।छाया।
शाला।निशा।इत्येवमंतस्तत्पुरुषोनपुंसकलिंगोभवति।विभाषा।ब्राह्मणसेनं।ब्राह्मणसेना।यव
सुरं।यवसुरा।कुड्यछायं।कुड्यछाया।गोशालं।गोशाला।श्वनिशं।श्वनिशा॥ ॥परवल्लिंगंद्वंद्वतत्पु

प्र.स्पाद ४
१२३

रुषयोः॥१॥समाहारद्वंद्वेन पुंसकलिंगस्य विहितत्वादितरेतरयोगद्वंद्वस्येदं ग्रहणं।परस्य यल्लिंगं तद्वंद्व
नि।द्वंद्वस्य तत्पुरुषस्य च।उत्तरपदलिंगं द्वंद्वतत्पुरुषयोर्विधीयते।कुक्कुटमयूर्याविमे।मयूरीकुक्कुटावि
मौ।तत्पुरुषस्य।अर्द्धपिप्पली॥अर्द्धकोशातकी॥द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वक्तव्यः
पंचसु कपालेषु संस्कृतः पुरोडाशः पंचकपालः।द्विकपालः॥प्राप्तो जीविकां प्राप्तजीविकः॥ ॥ ॥
आपन्नो जीवि[illegible] आपन्नजीविकः।अलं जीविकायै।अलंजीविकः।निःक्रांतः कोशांब्याः निःकोशांबिः।
पूर्ववदश्ववडवौ॥२८॥अश्ववडवयोर्विभाषा।एकवद्भाव उक्तः।तत्रैकवद्भावात्।अन्यत्र परवल्लिंग
ता[illegible]॥सायमिदमारभ्यते।अश्ववडवयोः पूर्ववल्लिंगं भवति।अश्ववडवावि।अश्ववडवौ।अर्था
ति[illegible] निपातनं।तेन द्विवचनमतंत्रं।वचनांतरेपि।परवल्लिंगता न भवति।अश्ववडवान्॥
अश्ववड[illegible]॥ ॥हेमंतशिशिरावहोरात्रे च छंदसि॥२९॥पूर्ववत्प्रतिवर्त्तते।हेमंतशिशिरे॥
अहोरात्रे इत्येतयोः छंदसि विषये पूर्ववल्लिंगं भवति।हेमंतशिशिरौ ऋतूनां प्रीणाति।अहोरात्रे इ ६

नाक।रेणु·स्थाणु·अनीक·उपवास·शाक·कर्पास·चषाल।शील·नील·शीतल·अर्बुद·रण·समर·
विल·चाल·वार।मृणाल·हस्त·तांडव·सौंडाव·मंडप·पटह।सौध·पार्श्व·शरीर·देह·पुर·राष्ट्र·विव।
पंक·कुंडल·कुहिम·तोरण·तोमर·चक्र·पुंख·मध्य·वाल·वल्मीक·वस्त्र·वर्ष·देह·वसंत·वस्तम·उघा
म·उद्यान·उघोष·स्वेद·स्तेन·संगम·निष्क·क्षेम·शूक·चित्र·पवित्र·यौवन·कल·कूषिक·वल्कल।कुंजर·
विहार·लोहित·विषाण·[illegible]न·पान·तत्र·आरण्य·पुलिन·दृढ·मर्व·आसन·ऐरावत·शूर्प·तीर्थ·लोमश·
तमाल·लोह·तडाक·तंडक·एकद्यायन·प्रतिसर·दारु·कूची·धनुष।कपट·विटप·सहस्र·औदन·प्रवा
ल·शकट·अपराह्ण·मल·नीड·शकल·अर्द्धर्चादि॥ ॥इदमोन्वादेशेशनुदात्तस्तृतीयादौ॥३२॥
आदेशः कथनं।अन्वादेशोनुकथनं।इदमः अन्वादेशविषये अशादेशो अदात्तस्तृतीयादौ वि
भक्तौ परतः।आभ्यां छात्राभ्यां रात्रिरधीता।अथो आभ्यामहरप्यधीतं।अस्मै छात्राय कंबलं देहि।
यो अस्मै शाटकमपि देहि।अस्य छात्रस्य शोभनं शीलं।अथो अस्य [illegible] तमपि [illegible]।अशादेशश्च

च नेन साकं कार्यं ॥ इमकाभ्यां छात्राभ्यां रात्रिरधीता । अथो आभ्यामहरप्यधीतं । नेह यस्योच्चारणमात्रमन्वा
देशः । किं तर्हि एकस्यैवाभिधेयस्य पूर्वं शब्देन प्रतिपादितस्य द्वितीयं प्रतिपादनमन्वादेशः । तेनेह न भवति
देवदत्तं भोजय इमं च यज्ञदत्तं भोजयेति ॥ ॥ एतदस्त्रतसोस्त्रतसौ चानुदात्तौ ॥ २।४। अन्वादेशे अश् अ
नुदात्त इति वर्तते । एतदोऽन्वादेशविषयस्य अशादेशो भवति । त्रतसोः परतः । तौ चापि त्रतसावनुदात्तौ भव
तः । एतस्मिन् ग्रामे सुखं वसामः । अथो अत्र युक्ता अध्यधीमहे । एतस्माच्छात्राच्छंदोऽधीष्व । अथो अतो व्याक
रणमधीष्व । सर्वानुदात्तं भवति । एतदोऽशि त्यशादेशे सिद्धे पुनर्वचनमन्वादेशे त्रापक्षेऽनुदात्तार्थं ॥ ॥
द्वितीयाटौस्स्वेनः ॥ २।४। अन्वादेशेऽनुदात्त इति वर्तते । द्वितीया । टा । ओस् । इत्येतेषु परत इदमेतदोरन्वा
देशविषययोरेनादेशो भवति । अनुदात्तः । इदमो मंडूकप्लुतिन्यायेनानुवृत्तिः । इमं छात्रं छंदोऽध्यापय ।
अथो एनं व्याकरणमध्यापय । अनेन छात्रेण रात्रिरधीता । अथो एनेनाहरप्यधीतं । अनयोः छात्रयोः शो
भनं शीलं । अथो एनयोः प्रभूतं स्वं । एतदः खल्वपि । एतं छात्रं छंदोऽध्यापय । अथो एनं व्याकरणमध्यापय ८

दं भ्रमः पुरशाङ्गिरापवादो योगः ॥ अर्थात्मिदेशाश्चायं न निपातनं । तेन द्विवचनमतंत्रं । सर्वपक्षाभ्रि । अ
परपक्षाः पुरीषमहोरात्राणि इष्टकाः । छंदसीति किम् । द्वे इमे तच्छिशिरे । अहोरात्रा विमौ पुण्यौ ।
छंदसि लिंगव्यत्यय उक्तः । तस्यैवायं प्रपंचः ॥ ॥ रात्राह्नाहाः पुंसि ॥ ३ ॥ तत्समासांतानां निर्देशः । रात्र ।
अह्न । अह । इत्येवमंताः पुंसि भाष्यंते । परवल्लिंगता यास्त्रीनपुंसकलिंगयोः प्राप्तयोः इदं वचनं । द्विरा
त्रः । पूर्वाह्णः । द्व्यह्नः । त्र्यहः । अनुवाकादयः पुंसि वक्तव्याः । अनुवाकः । शंयुवाकः । सूक्तवाकः ॥ ॥ अपथं
नपुंसकं ॥ ४ ॥ अपथशब्दो नपुंसकलिंगो भवति । अपथमिदं । अपथानि गाहते मूढः । इह कस्मान्न भव
ति । अपथो देशः । अपथा नगरी । तत्पुरुष इति वर्तते ॥ ॥ अर्धर्चाः पुंसि च ॥ ५ ॥ अर्धर्चादयः शब्दाः पुंसि
नपुंसके च भाष्यंते । शब्दरूपाश्रया चेयं द्विलिंगता । क्वचिदर्थभेदेनापि व्यवतिष्ठते । यथा पद्मशंखशब्दौ
निधिवचनौ पुंल्लिंगौ । जलजे द्विलिंगौ । भूतशब्दः पिशाचे नपुंसकलिंगः । क्रियाशब्दः प्राणिधेय
द्विलिंगौ । सैंधवशब्दो लवणे नपुंसकलिंगः । यौगिकस्याभिधेयवल्लिंगं । सारशब्द उत्कर्षे पुंल्लिंगः ॥

न्यायादनपेतेनपुंसकलिंगःनैतन्मारमिति।धर्मइत्यत्रसर्वेषुलिंगःनत्रसःधनेनपुंसकं।नानिधर्मालिप्रथमा
न्यासन्न।अर्द्धर्चाःगोमय।कषाय।कार्षापण।खलीन।पानीय।प्रोद।कविय।मुष्क।सीधु।शिखर।सुवर्ण।
वर्ण।पूर्व।चमस।कष।किरीट।हार।षष्ठक।निष्क।आकाश।अष्टापद।मंगल।निधन।निर्यास।जंन
मुस्त।मुसा।मुस्तक।पुस्तक।चूलित।शृंग।शिखर।मुख।शिंवल।मधु।मूलक·मुसल·सराव·[illegible]·वि
मान·प्रग्रीव।प्रवर·स्तूल·वज्र·कपट·कुतप·कुणप·कपाल·शंख·ग्रंथ·यूप·धज·कवच·कंट·
पद्म·गृह·सरक·कंस·दिवस·मूष·अंधकार·दंड·कमंडलु·मुंड·भूत·विनेव·घृत·द्वीप·चूप·च
क·धर्म·कर्मन·मोदक·शतमान·यान·नख·चरण·अक्ष·पुच्छ·दाडिम·हिम·रजत·रकु·विमान·
सार·पात्र·घृत·सैंधव·औषध·कंट·पंक·अटक·वषक·द्रोणक·फल्क।नाट·मस्तक·[illegible]·कु
सुम·तृण·पंक·किरीट·अंबुद·मंडल·मुंड।कुटीर·कुमुद·रर·अंकुश·तिमिर·आश्रम·भू
षण·मुकुल·मूसल·संत·तडाग·पिटक।विटंक·माष·कोश·फल·फलक·दिन·दैवत·पि·

एतेनकात्रे एरात्रिमधीतां।अयोएनेनाहरप्यधीतं।एतयोःकात्रयोःशोभनंशीलं।अयोएनयोःप्र
तंस्त्वं।एनदितिनपुंसकैकवचनेवक्तव्यं।प्रक्षालयैतत्।अथोमदिवत्रयेनत।इदकस्मान्नभवति
अयंदंडोदरानेनएतमातंङ्लिंविधादिति।यत्रकिंचिद्विधायवाक्[illegible]पादिश्यतेसोन्वादे
शः।इदश्चवक्तुनिर्दिश्यामात्रंत्वेकमेवविधानं॥ ॥आर्द्धधातुके॥ [illegible]र्धधातुकइत्यधि
कारः।तयष्क्रियार्थइतिपावत्।यदितऊर्ध्वमनुक्रमिष्यामःआर्द्धधातुकइत्येवतद्वेदितव्यं।वक्ष्यति
हनोवधोजिंङि।वध्यात्।आर्द्धधातुकइतिकिं।हन्यात्।विषयसप्तमीचेयं।नपरसप्तमी।तेनार्द्धधातु
कविवक्षायामादेशोपुक्तेनेषुपश्चाद्यथाप्राप्तंप्रत्ययाभवंति।नव्यं।प्रवेयं।आस्थेयं॥ ॥अदोजग्धि
र्ल्यप्तिकिति॥ ॥अदोजग्धिरादेशोभवति।ल्यप्यपितकारादौचकितिप्रत्ययेपरतः।आजग्ध्य॥
विजग्ध्य।तकारादौ।जग्धं।जग्धवान्।इकारउच्चारणार्थः।नानुबंधः।तेनेडुमन्नभवति।एवंचघ्या
दीनामपि।इदकस्मान्नभवति।अन्नं।अन्नाणइतिनिपातनात्।जग्धोऽग्निरितरंगत्वान्निकिनाति

ल्यब्ग्रहणं। ज्ञापयत्यंतरंगाणां ल्यपा भवति बाधनं। अघनं। क्तिनि जिकित्। अन्नव्यं॥ ॥लुङ्सनोर्घस्लृ॥
॥३७॥ लुङि सनि च परतः अदो घस्लृ आदेशो भवति। लृदित्करणमङर्थं। अघसत्। अघसतां। अघसन्।
सनि॥ जिघत्सति। जिघत्सतः। जिघत्संति। घस्लृभावे अप्युपसंख्याने॥ प्रात्ति निप्रघसः॥ ॥घञपोश्च॥
॥३८॥ घञि अपि च परतः अदेर्घस्लृ आदेशो भवति। घासः। प्रघसः। उपसर्गेदृइत्यप्॥ ॥बहुलं छंदसि॥
॥३९॥ छंदसि विषये बहुलं घस्लादेशो भवति। घस्तान्नूनं। सग्धिश्च मे। न च भवति। अन्नानामघमध्यतो मे ह-
उद्भृतं। अन्यतरस्यां। गृहणमेव कस्मान्न क्रियते। तदेवोत्तरार्थमपि भविष्यति। कार्यांतरार्थं बहुलग्रहणं
घस्लामित्यत्रोपधालोपो न भवति॥ ॥लिट्यन्यतरस्याम्॥४०॥ लिटि परतो देर्घस्लादेशो भवति। अन्य-
तरस्यां। जघास। जक्षतुः। जक्षुः। आद। आदतुः। आदुः॥ ॥वेञो वयिः॥४१॥ लिट्यन्यतरस्यामिति वर्त्त-
ते। वेञो लिटि परतोन्यतरस्यां वयि इत्ययमादेशो भवति। इकार उच्चारणार्थः। उवाय। ऊयतुः। ऊयुः।
ववतुः। ववुः। लिटि वयो य इति यकारस्य संप्रसारणं प्रतिषिध्यते। वश्चास्यान्यतरस्यां किति इति वकारो वि-

धीयते। ववौ। ववतुः। ववुः। वेञ इति संप्रसारणं न भवति॥ ॥हनो वध लिङि॥४२॥ हंतेः वध इत्यय-
मादेशो भवति। लिङि परतः। वध्यात्। वध्यास्तां। वध्यासुः। अकारांतश्चायमादेशः तत्राकारस्यातो लो-
पो भवति। तस्य स्थानिवद्भावात् हनवधीत्यत्रातो हलादेर्लघोरिति हलंतलक्षणा वृद्धिर्न भवति॥ ॥
लुङि च॥४३॥ लुङि च परतो हनो वध इत्ययमादेशो भवति। अवधीत्। अवधिष्टां। अवधिषुः। योगवि-
भाग उत्तरार्थः। आत्मनेपदेषु लिङि विकल्पो माभूत्॥ ॥आत्मनेपदेष्वन्यतरस्याम्॥४४॥ पूर्वेण नित्ये
प्राप्ते विकल्प उच्यते। आत्मनेपदेषु लुङि परतो हनो वध इत्ययमादेशो भवत्यन्यतरस्यां। आवधिष्ट।
आवधिषातां। आवधिषत। न चेह भवति। आहत। आहसातां। आहसत। आङो यमहन इत्यात्म-
नेपदं। हनः सिज्जिति कित्वं। अनुदात्तोपदेश इति नलोपः। ह्रस्वादंगादिति सिचो लोपः॥ ॥इणो गा लु-
ङि॥४५॥ इणो गा इत्ययमादेशो भवति। लुङि परतः। अगात्। अगातां। अगुः। लुङीति वर्त्तमाने
पुनर्लुङ्ग्रहणं आत्मनेपदेष्वन्यतरस्यामित्येतन्मा भूत् इह त्वविशेषेण नित्यं भवति। अगात्।

रवी

अगापि न भवति। इण्वदिक इति वक्तव्यम्॥ अध्यगात्। अध्यगातां। अध्यगुः॥ ॥णौ गमिरबोधने॥ ४६॥ णौ परत
इणः अबोधनार्थस्य गमिरादेशो भवति। इकार उच्चारणार्थः। गमयति। गमयतः। गमयंति। अबोधनार्थ इति किं।
अर्थान् प्रत्याययति। इण्वदिक इत्येव। अधिगमयति॥ ॥सनि च॥ ४७॥ सनि परत इणो ऽबोधनार्थस्य गमिरादे
शो भवति। जिगमिषति। जिगमिषतः। जिगमिषंति। अबोधन इत्येव। अर्थान् प्रतीषिषति। इण्वदिक इत्येवा अ
धिजिगमिषति। योगविभाग उत्तरार्थः। इङश्चेति सन्न्येव यथा स्यात्। णौ मा भूत्॥ ॥इङश्च॥ ४८॥ इङश्च सनि पर
तो गमिरादेशो भवति। अधिजिगांसते। अधिजिगांसेते॥ ॥गाङ् लिटि॥ ४९॥ इङो गाङादेशो भवति लिटि पर
तः। अधिजगे। अधिजगाते। अधिजगिरे। गाङो ङकारानुबंधकरणं। विशेषणार्थं। गाङ् कुटादिभ्य इत्यत्र गाङिति
ग्रहणं यथा स्यात्। न हि स्थानिवद्भावात् गाङिति रूपं लभ्यते॥ ॥विभाषा लुङ्लृङोः॥ ५०॥ लुङि लृङि च पर
तः इङो विभाषा गाङादेशो भवति। आदेशपक्षे गाङ्कुटादिभ्य इति ङित्वं। घुमास्थागापा ईत्वं। अध्य
गीष्ट। अध्यगीषातां। अध्यगीषत। न च भवति। अध्यैष्ट। अध्यैषातां। अध्यैषत। लृङ्यपि। अध्यगी १०

ष्यत। अध्यगीष्येतां। अध्यगीष्यंत। न च भवति। अध्यैष्यत। अध्यैष्येतां। अध्यैष्यंत॥ ॥णौ च संश्चङोः॥ ५१॥
इङो गाङ् विभाषा निवर्त्तते। णाविति। अपेक्षया। णौ च सन्परे चङ्परे। परसप्तमी। यं संश्चङोरिति। एवं पेक्षया णौ स
न्परे चङ्परे च परत इङो विभाषा गाङादेशो भवति। अधिजिगापयिषति। अध्यापिपयिषति। चङि ख
ल्वपि। अध्यजीगपत्। अध्यापिपत्॥ ॥अस्तेर्भूः॥ ५२॥ अस्तेर्भू इत्ययमादेशो भवति। आर्द्धधातुके। भवि
ता। भवितुं। भवितव्यं। इह कस्मान्न भवति। ईहामास। ईहामासतुः। ईहामासुः। अस्त्यनुप्रयुज्यते। लि
टि प्रत्याहारग्रहणेन। अस्तेर्ग्रहणसामर्थ्यात्। तथा चोच्यते। अनुप्रयोगे तु भुवा ऽस्त्यबाधनं स्मरंति।
कर्तुर्वचनान्मनीषिणः॥ ॥ब्रुवो वचिः॥ ५३॥ ब्रुवो वचिरादेशो भवति। आर्द्धधातुकविषये। इकार उ
च्चारणार्थः। वक्ता। वक्तुं। वक्तव्यं। स्थानिवद्भावेन कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदं भव
ति। ऊचे। वक्ष्यते॥ ॥चक्षिङः ख्याञ्॥ ५४॥ चक्षिङः ख्याञादेशो भवति। आर्द्धधातुके। आख्याता। आ
ख्यातुं। आख्यातव्यं। स्थानिवद्भावेन नित्यमात्मनेपदं न भवति। ञकारानुबंधकरणसामर्थ्यात्। आख्या

स्यति। आख्यास्यते। कशादिरप्ययमादेश इष्यते। आक्शाता। आक्शातुं। आक्शातव्यं। वर्जने प्रतिषेधो
वक्तव्यः। दुर्जनाः संचक्ष्याः। वर्जनीया इत्यर्थः। असनयोश्च प्रतिषेधो वक्तव्यः। नृचक्षा राक्षसः। हिसार्थो
त्रधातुः। अनेन खल्वपि। विचक्षणः। बहुलं संज्ञाछंदसोरिति वक्तव्यं। अन्नचित्तणबधकगात्राजिरांघर्यं
॥ ॥वा लिटि॥५५॥ पूर्वेण नित्ये प्राप्ते विकल्प उच्यते। लिटि परतो वा चक्षिङः ख्यात्रादेशो भवति। आचख्यौ।
आचख्यतुः। आचख्युः। न भवति। आचचक्षे। आचचक्षाते। आचचक्षिरे॥ ॥अजेर्व्यघञपोः॥५६॥ अजे
र्वी इत्ययमादेशो भवति आर्द्धधातुके। घञमपं च वर्जयित्वा। प्रवायकः। प्रवयणीयः। अघञपोरिति किम्
समाजः। उदाजः। अपि समजः। उदजः। समुदो रजः। पशुष्वित्यप्। दीर्घोच्चारणं किं। प्रवीतः। प्रवीतवान्॥
वलपोः प्रतिषेधे क्यप उपसंख्यानं। समज्या। वलादावार्द्धधातुके विकल्प इष्यते। प्रविता। प्राजिता। प्रवेतुं।
प्राजितुं॥ ॥वा यौ॥५७॥ पूर्वेण नित्ये प्राप्ते विकल्प उच्यते। यु इति ल्युटो ग्रहणं। यो परतोऽजेर्वी इ
त्ययमादेशो भवति। प्रवयणो दंडः। प्राजनो दंडः। प्रवयणमानय। प्राजनमानय॥ ॥ण्यक्षत्रियार्षञितो ११

यूनि लुगणिञोः॥५८॥ एषामित्योगेभ्यस्तत्ययाः। तेषां तान्नक्षत्रियगोत्रात्। आर्षात्। ञितश्च। परयोरणि
ञोश्च यूनि लुग्भवति। कुर्वादिभ्यो ण्यः। तस्माद्यूनि इञ्। तस्य लुक् भवति। कौरव्यः पिता। कौरव्यः पुत्रः। गा
र्ग्यः पिता। गार्ग्यः पुत्रः। ननु कौरव्यशब्दः क्षत्रियवाचिकादिक्षु पठ्यते। ततः फिञा भवितव्यं। कौरव्यायणिरिति। क्षत्रि
यगोत्रस्य तत्र ग्रहणं। कुरुनादिभ्यो ण्य इत्यनेन विहितस्य इदं तु ब्राह्मणगोत्रं। कुर्वादिभ्य इति एषः।
क्षत्रियात्। ऋष्यंधकवृष्णिकुरुभ्यश्चेत्यण्। तस्माद्यूनि इञ्। तस्य लुक्। श्वाफल्कः पिता। श्वाफल्कः पु
त्रः। आर्षात्। ऋष्यण्। तस्माद्यूनि इञ्। तस्य लुक्। वासिष्ठः पिता। वासिष्ठः पुत्रः। ञितः। आन्तर्यानन्तर्ये विदा
दिभ्योऽञ्। तस्माद्यूनि इञ्। तस्य लुक्। वैदः पिता। वैदः पुत्रः। अलः खल्वपि। तिकादिभ्यः फिञ्। तस्माद्यू
नि प्राग्दीव्यतोऽण्। तस्य लुक् न भवति। नैकायनिः पिता। नैकायनिः पुत्रः। एतेभ्य इति किम्। ञ्चिवादिभ्यो
ऽण्। तस्माद्यूनि इञ्। तस्य लुक् न भवति। कौहलः पिता। कौहलिः पुत्रः। परयोरिति किम्। वामरथस्येदमि
ति छात्रा वामरथाः। कुर्वादिभ्यो ण्य इति एषः। तस्मात् कण्वादिभ्यो गोत्र इति शैषिकोऽण्। तस्य लुङ् न भवति

अणिञोरितिकिम्।दाक्षेरपत्यंयुवादाक्षायणः।यञिञोश्चेतिफक्।अत्रास्त्रणगोत्राद्युवप्रत्ययस्योप
संख्यानं।बोधिःपिता।बौधिःपुत्रः।जाबालिःपिता।जाबालिःपुत्रः।औदुंबरिःपिता।औदुंबरिःपुत्रः।नौडि
जंघिःपिता।नौडिजंघिःपुत्रः।साल्वावयवलक्षणइञ्।तस्मात्यञिञोश्चेतिफक्।तस्यलुक्।पोव्यादिदर्श
नाद्वासिद्धं॥ ॥पैलादिभ्यश्च॥५८॥पैलइत्येवमादिभ्यश्चयुवप्रत्ययस्यलुग्भवति।पीलायावेत्यण्।तस्मा
दणोद्व्यचइतिफिञ्।तस्यलुक्।पैलःपिता।पैलःपुत्रः।अन्येपैलादयइञन्ताः।तेभ्यःइञःप्राचामितिनिमित्ते
लुक्यप्रागर्थःपाठः।पैल।शालंकि।सात्यकि।सात्यंकामि।औदंचि।औदमज्जि।औदमेघि।औदव्रजि।
औदभृज्जि।देवस्थानि।पैंगलायनिः।औदायनिः।राहक्षतिः।भौलिंगि।राणि।सोमहि।औद्गाहमानि॥
औज्जिहायनि।औदशुद्धि।तद्राजाच्चाणः।आकृतिगणश्चायं॥ ॥इञःप्राचां॥६०॥प्राचांगोत्रेय
इञन्तंतेनायुवप्रत्ययस्यलुग्भवति।गोत्रविशेषणंप्राग्ग्रहणं।नविकल्पार्थं।प्राग्रागारेरपत्यंयुवा।यञि
ञोश्चेतिफक्।तस्यलुक्।प्राग्रागारिःपिता।प्राग्रागारिःपुत्रः।मांथरिषणिःपिता।मांथरेषणिःपुत्रः॥ १२

प्राचामितिकिम्।दाक्षिःपिता।दाक्षायणःपुत्रः॥ ॥नतौल्वलिभ्यः॥६१॥अनंतरेणप्राप्तोलुक्प्रतिषिध्य
ते।तौल्वल्यादिभ्यःपरस्ययुवप्रत्ययस्यलुङ्नभवति।तौल्वलिःपिता।तौल्वलिःपुत्रः।वाराणि।रावणि।
दैलीपि।दैवमति।दैवयज्ञि।प्राणाहति।रंधकि।वैकि।अनुराहति।श्वाफल्कि।पौष्करसादि।वापट्टकि
आहिंसि।आसुरि।आयुधि।नैमिषि।आशि।बंधकि।पारणिः।दौलपिः।आनुमति।वैकि।पौष्पि।पौष्कर
सादि।वैरकि।वैलकि।वैदकि।वैकर्णि।कारेणुपालि।चैरकि।वैहति।कामलिः॥ ॥तद्राजस्यबहुषुतेनै
वास्त्रियां॥६२॥तेनतद्राजाःप्यादयस्तद्राजाइतिवक्ष्यति।तस्यतद्राजसंज्ञकस्यप्रत्ययस्य।बहुषुवर्तमा
नस्यास्त्रीलिंगस्यलुग्भवति।तेनैवचेत्तद्राजेनकृतंबहुत्वंभवति।अंगाः।वंगाः।सुह्माः।पुंड्राः।मगधाः॥
लोहध्वजाः।व्रीहिमताः।तद्राजस्येतिकिम्।औपगवाः।बहुष्वितिकिम्।आंगः।तेनैवेतिकिम्।प्रियोवांगोये
षांतइमेप्रियवांगाः।अस्त्रियामितिकिम्।आंग्यःस्त्रियः॥ ॥यस्कादिभ्योगोत्रे॥६३॥बहुषुतेनैवास्त्रि
यामिति।सर्वमनुवर्तते।यस्कइत्येवमादिभ्यःपरस्यगोत्रप्रत्ययस्यबहुषुवर्तमानस्यास्त्रीलिंगस्य

लुग्भवति।तेनैवचेद्गोत्रप्रत्ययेनबहुत्वंतर्हिनभवति।प्रत्ययविधेश्चान्यत्रलौकिकस्यगोत्रस्यग्रहणमि
ष्यतेतराप्रत्येपिलुग्भवत्येव।यस्काः।लह्याः।द्रुह्याः।बहुष्वित्येव।यास्कः।तेनैवेत्येव।प्रिययास्काः।अस्त्रि
यामित्येव।यास्क्यः।स्त्रियः।गोत्रइतिकिम्।यास्काःछात्राः।यस्क।लह्य।द्रुह्य।अयःस्थूण।तृण।कर्ण।
एतेपंचशिवादिषुपठ्यंते।ततःपरेभ्यःसप्तभ्यइञ्।सदामत्त।कंबलहार।बहिर्योग।पर्णाढक।कर्णा
टक।पिंडीजंघ।बकसक्थ।ततःपरेभ्यश्चतुर्भ्योगिरिष्ठादिभ्यश्चेतिठक्।विश्रि।कुद्रि।अजबस्ति।कद्रुमित्र
यु।ततःपरेभ्योद्वादशभ्यइञ्।रक्षोमुख।उत्कास।कटुक।मंथक।उद्धासक।पुष्करसत्।विषपुट।उपरि
मेखल।क्रोष्टुमान।क्रोष्टुपाद।क्रोष्टुमाय।शीर्षमाय।पुष्करसच्छब्दस्यबाह्वादिषुपाठादिञ्।खरप
श्चनडादिषुपठ्यते।ततःफक्।पदक।वर्मक।एताभ्यामत्रइञ्।भलन्दनशब्दःशिवादिभ्योण्।भडिल।भं
डिल।भडित।भंडित।एतेभ्यश्चतुर्भ्योश्वादिभ्यःफञ्॥ ॥यञञोश्च॥६४॥बहुषुतेनैवास्त्रियामितिगो
त्रइतिचसर्वमनुवर्त्तते।यञः।अञः।गोत्रप्रत्ययस्यबहुषुवर्त्तमानस्यलुग्भवति।गर्गादिभ्योयञ्॥ १३

गर्गाः।वत्साः।अञः।खल्वपि।अनृष्यानंतर्येबिदादिभ्योञ्।बिदाः।उर्वाः।बहुष्वित्येव।गार्ग्यः।बैदः।
तेनैवेत्येव।प्रियगार्ग्याः।प्रियबैदाः।अस्त्रियामित्येव।प्रियगार्ग्याः।प्रियबैदाः।अस्त्रियामित्येव।गा
र्ग्यः।स्त्रियः।बैद्यः।स्त्रियः।गोत्रइत्येव।द्वीपादनुसमुद्रंयञ्।द्वैप्याः।उत्सादिभ्योञ्।औत्साःछात्राः।य
ञादीनामेकद्वयोर्वातत्पुरुषेषष्ठ्याउपसंख्यानं।गार्ग्यस्यकुलं।गार्ग्यकुलं।गर्गकुलं।वा।गार्ग्ययोः
कुलंगार्ग्यकुलं।गर्गकुलंवा।बैदस्यकुलं।बैदकुलं।बिदकुलं।बैदयोःकुलं।बैदकुलं।बिदकुलं
वा।यञादीनामितिकिम्।आंगकुलं।एकद्वयोरितिकिम्।गर्गाणांकुलं।गर्गकुलं।तत्पुरुषइतिकिं।
गार्ग्यस्यसमीपं।उपगार्ग्यं।षष्ठ्याइतिकिम्।परमगार्ग्यः॥ ॥अत्रिभृगुकुत्सवसिष्ठगोतमांगिरो
भ्यश्च॥६५॥अत्र्यादिभ्यःपरस्यगोत्रप्रत्ययस्यबहुषुवर्त्तमानस्यलुग्भवति।अत्रिशब्दादितश्चा
निञइतिढक्।इतरेभ्यऋष्यण्।अत्रयः।भृगवः।कुत्साः।वसिष्ठाः।गोतमाः।अंगिरसः।बहुष्वि
त्येव।आत्रेयः।भार्गवः।तेनैवेत्येव।प्रियात्रेयाः।प्रियभार्गवाः।अस्त्रियामित्येव।आत्रेय्यःस्त्रियः॥

बह्वच इञः प्राच्यभरतेषु॥६६॥ बह्वचः प्रातिपदिकाद्य इञ् विहितस्तस्य प्राच्यगोत्रे भरतगोत्रे च वर्त्तमानस्य
बहुषु लुग्भवति। पान्नागाराः। मंथवेषणाः। भरतेषु खल्वपि। युधिष्ठिराः। अर्जुनाः। बह्वच इति किं। चैकय-
पोष्यपः। प्राच्यभरतेष्विति किं। बालाकयः। हास्तिदासयः। भरताः प्राच्या एव। तेषां पृथग्ग्रहणं ज्ञापनार्थं
अन्यत्र प्राच्यग्रहणे भरतग्रहणं न भवतीति। तेनेह यस्कं प्राचामिति भरतानां युवप्रत्ययस्य लुङ् न भवति
आर्ज्जुनिः पिता। आर्ज्जुनायनः पुत्रः॥ ॥न गोपवनादिभ्यः॥६७॥ गोपवनादिभ्य उत्तरस्य परस्य प्रत्य-
यस्य लुङ् न भवति। विदाद्यंतर्गणोयं। तत्र यो गोत्रप्रत्ययस्तस्य यञञोश्चेति लुक् प्राप्तः प्रतिषिध्यते। गौपव-
नाः। शैग्रवाः। गोपवन। शिग्रु। बिंदु। भाजन। अश्ववत्। अवतान। श्यामाक। श्यामक। श्यापर्ण। एतावंत एव च गो-
पवनादयः। परिशिष्टानां हरितादीनां प्रमादपाठः। ते हि विदादिषु पठ्यंते। तेभ्यश्च बहुषु लुग्भवत्ये-
व। हरिताः। किंदासा इति॥ तिककितवादिभ्यो द्वंद्वे॥६८॥ तिककितवादिभ्यश्च सहेभ्यो द्वंद्वे समासे प्रा-
प्तो गोत्रप्रत्ययस्य बहुषु लुग्भवति। तैकायनयश्च कैतवायनयश्च तिकादिभ्यः फिञ् तस्य लुक्। तिककितवाः १४

वंक्षरथयश्च औद्दारथयश्च अतइञ् तस्य लुक्। कभरकाः। काभरवयश्च गौदपरिणद्धा। वंक्षरभंडीरथाः
औपकायनाश्च लामकायनाश्च नडादिभ्यः फक् तस्य लुक्। उपकलमकाः। पाफकयश्च नारकयश्च अ-
तइञ् तस्य लुक्। पफकनरकाः। काभरवयश्च गौदपरिणद्धयश्च अतइञ् तस्य लुक्। कभरगुदपरिणद्धाः।
अब्जुदाशादतइञ्। ककुभशब्दाच्छिवादिभ्योण्। तयोर्लुक्। आब्जयनश्च कौकुभाश्च अब्जकुकुभाः। लां-
कयश्च शांतमुखमयश्च अतइञ् तस्य लुक्। लंकशांतमुखाः। उरशशब्दात् तिकादिषु पठितः फिञ्। शालंकट
शब्दादतइञ् तयोर्लुक्। औरशायनयश्च शालंकटयश्च उरशशालंकटाः। काश्यप्यनिपयश्च कार्म्मश्चंद्रय-
श्च अतइञ् तस्य लुक्। भस्मादिना भस्मसुंदराः। अग्निवेशशब्दाद् गर्गादिभ्यो यञ्। दासेरकशब्दादतइञ् तत-
योर्लुक्। आग्निवेश्यश्च दासेरकयश्च अग्निवेशदासेरकाः। काष्ठकयश्च कापिष्ठलयश्च अत-
इञ् तस्य लुक्। काष्ठककपिष्ठलाः॥ ॥उपकादिभ्योन्यतरस्यामद्वंद्वे॥६९॥ उपकादिभ्यस्तद्राजात्
गोत्रप्रत्ययस्य बहुषु वर्त्तमानस्य लुगन्यतरस्याम्। द्वंद्वे चाद्वंद्वे च। अद्वंद्वग्रहणं द्वंद्वाधिकार

अ॰पा॰२४
१३२

निदर्शनार्थं। एतेषां च मध्ये त्रयो द्वंद्वाः सन्ति। कितवादिषु पठ्यंते। उपकमलकाः। भ्राष्टककपिष्ठलाः। कृष्णाजि
नकृष्णसुंदरा इति। तेषां द्वंद्व एव लुग्भवति। अद्वंद्वे त्वनेन विकल्पः। उपकाः। औपकायनाः। मलकाः।
मालकायनाः। भ्राष्टकाः। भ्राष्टकयः। कापिष्ठलाः। कापिष्ठलयः। कृष्णाजिनाः। कार्ष्णाजिनयः। कृष्णसुंदराः।
कार्ष्णसुंदरयः। परिशिष्टानां द्वंद्वे वा द्वंद्वे च विकल्पः। वडारकाः। अडारकाः। खडुकाः। अवंधकाः। पिंगलाः। कपि
काः। सुपिष्टाः। मयूरकर्णाः। खरीजंघाः। शलाथलाः। पतंजलिः। काठेहिणि। कासकृत्स्नाः। गडु। उषितकाः। कृशाः। कृष्ण
निदाघाः। कालशीलकंठाः। दामकंठाः। कृष्णपिंगलाः। कर्णाः। पर्णकाः। जटिलकाः। जंतुकाः। बधिरकाः। उपदस्वपिंगलकाः।
अनुलोमाः। प्रतिलोमाः। अविदग्धंप्रजनाः। अनभिहिताः॥७०॥ आगस्त्यकौंडिन्ययोरगस्तिकुंडिनच्॥ ॥
आगस्त्यकौंडिन्या इत्येतयोर्गोत्रप्रत्यययोरणोर्यञश्च बहुषु लुग्भवति। परिशिष्टस्य प्रकृतिभागस्य यथा
संख्यमगस्तिकुंडिनच् इत्येतौ आदेशौ भवतः। अगस्तयः। कुंडिनाः। चकारः स्वरार्थः। मध्योदात्तो हि कुंडिनी
शब्दः। तदादेशोपि तथा स्यात्। अगस्त्यशब्दादृष्यण्। कुंडिनीशब्दाद्गर्गादियञ्। तयोर्गोत्रे लुक् च। १५

ति। लुकि प्रतिषिद्धे आगस्तीयाश्छात्रा इति वृद्धलक्षणश्छो भवति। कौंडिन्ये त्वणैव भवितव्यं। कण्वा
दिष्वगोत्र इति। तत्र विशेषो नास्ति। कौंडिनाः छात्राः। चकारः स्वरार्थः॥७१॥ सुपो धातुप्रातिपदि
कयोः॥ ॥ सुपो विभक्तेः धातुसंज्ञायाः प्रातिपदिकसंज्ञायाश्च लुग्भवति। तदंतर्गतास्तद्ग्रहणेन
गृह्यंते। धातोस्तावत्। पुत्रीयति। पटीयति। प्रातिपदिकस्य। कष्टश्रितः। राजपुरुषः। धातुप्रातिपदि
कयोरिति किं। वृक्षः। प्लक्षः॥७२॥ अदिप्रभृतिभ्यः शपः॥ ॥ आदिप्रभृतिभ्यो धातुभ्यः उत्तरस्य
शपो लुग्भवति। अत्ति। हंति। द्वेष्टि॥७३॥ बहुलं छंदसि॥ ॥ छंदसि विषये बहुलं शपो लुग्भवति।
आदिप्रभृतिभ्यः स्मरूके। तत्रौ न भवति। वृत्रं हनति। अहिः शयते। अन्येभ्यश्च भवति। त्राध्वं नो देवाः
॥७४॥ यङोऽचि च॥ ॥ यङो लुग्भवत्यचि प्रत्यये परतः। चकारेण बहुलग्रहणमनुकृष्यते। नतु
छंदसा। तितेन छंदसि भाषायां च यङ्लुग्भवति। लोलुवः। पोपुवः। सनीस्रंसः। दनीध्वंसः। बहुलग्र
हणादन्यत्रापि भवति। शाकुनिको लोलुयमानानिर्दुंदुभिश्चर्करीति॥७५॥ जुहोत्यादिभ्यः श्लुः॥ ॥

...स्या२४

२३३

त्राबनुवर्त्तते। न यङ्॥ जुहोत्यादिभ्य उत्तरस्य शपः श्लुर्भवति। लुकि प्रकृते श्लुविधानं द्विर्वचनार्थं। जुहोति।
बिभेति। नेनेक्ति॥ ॥बहुलं छंदसि॥ ७६॥ छंदसि विषये बहुलं शपः श्लुर्भवति। यत्रोक्तस्तत्र न भवति। न
तोऽन्यत्र च भवति। जुहोत्यादिभ्यस्त्वावन्न भवति। दाति प्रियाणि। धाति प्रियाणि। अन्येभ्यश्च भवति। पूर्णां
विवष्टि। जनिमा विवक्ति॥ ॥गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु॥ ७७॥ लुगिति वर्त्तते। न श्लुः॥
गाति। स्था। घु। पा। भू॥ इत्येतेभ्यः उत्तरस्य सिचो लुग्भवति परस्मैपदेषु परतः। अगात्। अस्थात्। घु। अदा
त्। अधात्। अपात्। अभूत्। गापोर्ग्रहणे इण्पिबत्योर्ग्रहणं। गायतेः पातेश्च न भवति। अगासीन्नटः।
अपासीन्नृपः। परस्मैपदेष्विति किम्॥ अगासातां ग्रामो देवदत्तेन॥ ॥विभाषा घ्राधेट्शाछासः॥
॥ ७८॥ घ्रा। धेट्। शा। छा। सा। इत्येतेभ्य उत्तरस्य सिचः परस्मैपदेषु परतो विभाषा लुग्भवति। धेटः पूर्वे
ण प्राप्ते परिशिष्टानामप्राप्ते विभाषा॥ अघ्रासीत्। अघ्रात्। अधात्। अधासीत्। अशात्। अशासीत्।
अछात्। अछासीत्। असात्। असासीत्। परस्मैपदेष्वित्येव। अघ्रासातां। सुमनसो देवदत्तेन॥ ॥ १६

तनादिभ्यस्तथासोः॥ ७९॥ तनादिभ्य उत्तरस्य सिचस्तथासोः परतो विभाषा लुग्भवति। अतत। अतथाः
अतनिष्ट। अतनिष्ठाः। असात। असाथाः। असनिष्ट। असनिष्ठाः। जनसनखनामित्यात्वं। थासासा
हचर्यादात्मनेपदस्य थाशब्दस्य ग्रहणं। तेनेह न भवति। अतनिष्ट यूयमिति॥ ८० ॥मंत्रे घसह्वरण
शवृदहाद्वृच्कृगमिजनिभ्यो लेः॥ ॥ मंत्रविषये। घस। ह्वर। णश। वृ। दह। आत्। वृच्। कृ। गमि।
जन। इत्येतेभ्य उत्तरस्य लेर्लुग्भवति। घस। अक्षन्नमीमदंत पितरः। ह्वरेति। ह्वृ कौटिल्ये। मा ह्वर्मि
११ त्रस्य त्वं। णश। प्रणङ्मर्त्यस्य। वृ इति वृङ्वृञोः सामान्यग्रहणं। सुरुचो वेन आवः। दह। मान
आधक्। आदिति। आकारान्तानां ग्रहणं। प्रा पूरणे। आप्रा द्यावापृथिवी अंतरिक्षं। वृजिति।
वृजि वर्जने॥ मानो अस्मिन्महाधने परावर्क्। कृ। अक्रन् कर्म कर्मकृतः। गमि। अग्म
न्। जनि। अज्ञत वा अस्य दंताः। ब्राह्मणे प्रयोगोऽयं। मंत्रग्रहणं छंदस उपलक्षणं॥ ८०॥ ॥
आमः॥ ॥ आम उत्तरस्य लेर्लुग्भवति। ईहांचक्रे। ईहांचक्राते॥ ८२॥ अव्ययादाप्सुपः॥ ८२॥

अव्ययादुत्तरस्यापः सुपश्च लुग्भवति। एकापाये पंचमी। अर्थवन्तं हि धात्विघने। अव्ययात्त्रागापो लु
भवति। तत्र शालायां। तत्र शालायां। सुपः खल्वपि। कृत्वा। हृत्वा॥ ८२॥ नाव्ययीभावादतोम्त्वपंचम्याः॥
॥ पूर्वेण लुक्प्राप्तः प्रतिषिध्यते। अदंतादव्ययीभावादुत्तरस्य सुपो लुङ् न भवति। अमा
देशश्च भवति। पंचमीं वर्जयित्वा। तस्मिन्प्रतिषिद्धे पंचम्याः श्रवणमेव भवति। उपकुंभं तिष्ठति॥
उपकुंभं पश्य। अतइतिकिम्। अधिस्त्रि। अधिकुमारि। अपंचम्याइतिकिम्॥ उपकुंभादान
य॥ ८४॥ तृतीयासप्तम्योर्बहुलं॥ ॥ पूर्वेण नित्यमेम्भावे प्राप्ते इदं वचनं। तृतीयासप्तम्योर्ब
हुलममादेशो भवति। उपकुंभेन कृतं। उपकुंभं कृतं। उपकुंभं निधेहि। उपकुंभे निधेहि। सप्तम्या
ऋद्धिनदीसमाससंख्यावयवेभ्यो नित्यमिति वक्तव्यम्। ऋद्धिसमासो सुमद्रं। नदीसमास॥
उन्मत्तगंगम्। संख्यावयव। एकविंशतिभारद्वाजं। बहुलवचनात्सिद्धं॥ ८५॥ लुटः प्रथमस्य डा
रौरसः॥ ॥ लुडादेशास्य प्रथमपुरुषस्य परस्मैपदस्यात्मनेपदस्य च॥ डा। रौ। रसः। इत्येते

आदेशा भवंति। यथासंख्यं॥ कर्त्ता। कर्त्तारौ। कर्त्तारः। आत्मनेपदस्य च। अध्येता। अध्येतारौ॥
अध्येतारः॥ प्रथमस्येतिकिम्। श्वः कर्त्तासि॥ ॥श्री॥ ॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥
॥ इति श्रीमद्वामनजन्तायां काशिकायां वृत्तौ द्वितीयाध्यायस्य चतुर्थः पादः समाप्तः॥ ॥ ॥
॥ ॥छ॥ ॥छ॥ ॥समाप्तोयं द्वितीयाध्यायः॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

५८